निःश्रेयसं, क्ली, ( निर्निश्चितं श्रेयः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः । ) शुभम् । ( यथा, भागवते । १।३।४० ।
"इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमःश्लोकचरितं चकार भगवानृषिः ।
निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं परम् ॥")
मोक्षः । ( यथा, मनुः । १२ । ८३ ।
"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥")
विद्या । अनुभावः । भक्तिः । इति शब्दरत्नावली ॥

निःश्रेयसः, पुं, (निर्निश्चितं श्रेयो मङ्गलं यस्मात् ।) शङ्करः । इति मेदिनी । से, ५६ ॥

निःषमं, व, ( निर्गतं समं यत्र । "तिष्ठद्गुप्रभृतीनि च ।" २ । १ । १७ । इत्यव्ययीभावत्वम् । सुविनिर्दुर्भ्यः इति षत्वम् । ) निन्दा । तत्पर्य्यायः । गर्हणम् । दुःषमम् ३ । इत्यमरः । ३ । ४ । १४ ॥ शोकः । इति शब्दरत्नावली ॥

निःसङ्गः, त्रि, ( निर्नास्ति सङ्गो यत्र । ) मेलनरहितः । यथा, विष्णुपुराणे । ४ । २ । ५१ ।
"मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥"
फलानभिनिवेशवान् । यथा,—
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यसिद्धिं लभते रोचनार्था फलश्रुतिः ॥"
इति मलमासतत्त्वे श्रीभागवतैकादशस्कन्धवचनम् ॥

निःसन्धिः, त्रि, ( निर्नास्ति सन्धिर्यत्र । ) दृढः । इति त्रिकाण्डशेषः ॥ सन्धिरहितश्च ॥

निःसम्पातः, पुं, ( निर्नास्ति सम्पातो गमनागमनं यत्र ।) निशीथः । इति त्रिकाण्डशेषः ॥ (गमनागमनपरिशून्ये, त्रि । यथा, हरिवंशे । ८० । १३—१४ ।
"तेन दुष्टप्रचारेण दूषितं तद्वनं महत् ।
न नृभिर्गोधनैर्वापि सेव्यते वनवृत्तिभिः ।
निःसम्पातः कृतः पन्थास्तेन तद्विषयाश्रयः ॥" )

निःसरणं, क्ली, ( निर् + सृ + ल्युट् । ) मरणम् । उपायः । गेहादिमुखम् । निर्व्वाणम् । निर्गमः । इति हेमचन्द्रः ॥ ( यथा, देवीभागवते । ४ । २ । २८
"गर्भवासे महद्दुःखं दशमासनिवासनम् ।
तथा निःसरणे दुःखं योनियन्त्रेऽतिदारुणे ॥")

निःसारः, पुं, (निर्गतः सारो यस्मात् । ) शाखोटवृक्षः । इति शब्दचन्द्रिका ॥ श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ साररहिते, त्रि । यथा,—
"मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वम् ॥
"जगत् सर्व्वमु निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते क्षणादेतत् क्षणादेतद्विपद्यते ॥
यथैवोत्पद्यते सारान्निःसारं जगदञ्जसा ।
पुनस्तस्मिन् निलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः ।
शम्भवे दर्शयामास भावेन जगतां पतिः ॥"
इति कालिकापुराणे २७ अध्यायः ॥

निःसारणं, क्ली, (निर् + सृ + णिच् + भावे ल्युट् ।) निःसरणम् । ( निःसार्य्यतेऽनेनेति । निर् + सृ + णिच् + करणे ल्युट् ।) गृहादीनां प्रवेशनिर्गमादिपथः । इति शब्दरत्नावली ॥

निःसारा, स्त्री, ( निर्नास्ति सारो यस्याः । ) कदलीवृक्षः । इति राजनिर्घण्टः ॥

निःसारितः, त्रि, ( निर् + सृ + णिच् + कर्म्मणि क्तः । ) बहिष्कृतः । तत्पर्य्यायः । अवकृष्टः २ निष्कासितः ३ । इति जटाधरः ॥ साराभाववांश्च ॥

निःस्नेहः, त्रि, ( निर्नास्ति स्नेहो यस्य । ) स्नेहशून्यः । यथा । निःस्नेहं कीटदूषितमित्यादि स्मृतिः ॥ ( यथा, रामायणे । २ । ४६ । ७ ।
"अहो दशरथो राजा निःस्नेहः स्वसुतं प्रति ॥"
रसहीनः । यथा, मनुः । ५ । ८७ ।
"नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥"
तैलविहीनः । यथा, पञ्चतन्त्रे । १ । ६४ ।
"शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥")

निःस्नेहा, स्त्री, ( निर्गतः स्नेहः रसो यस्याः ।) अतसी । इति त्रिकाण्डशेषः ॥ (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ४७ ।
"यदर्थे स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥")

निःस्रावः, पुं, ( निःस्रवतीति । निर् + स्रु + णः ।) भक्तरसः । भक्तसमुद्भवमण्डः । माड़ इति येनु इति च भाषा ॥ तत्पर्य्यायः । आचामः २ मासरः ३ । इत्यमरहेमचन्द्रौ ॥

निःस्वः, त्रि, ( निर्नास्ति स्वं धनं यस्य । ) दरिद्रः । इत्यमरः । ३ । १ । ४८ ॥ तस्य लक्षणं यथा,—
"शूर्पाकारौ विरूक्षौ च वक्रौ पादौ शिरालकौ ।
संशुष्कौ पाण्डरनखौ निःस्वस्य विरलाङ्गुली ॥"
इति गारुड़े सामुद्रकम् ॥
ज्ञातिरहितश्च ॥

निकटं, त्रि, ( नि समीपे कटतीति । नि + कट + अच् । ) अदूरम् । तत्पर्य्यायः । समीपम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीड़म् ५ । इत्यमरः । ३ । १ । ६६ ॥ अभ्यासः ६ सवेशः ७ अन्तः ८ अन्तिकः ९ समर्य्यादः १० सदेशः ११ अभ्यसः १२ अभ्यर्णः १३ सविधा १४ उपकण्ठः १५ अभितः १६ । इति शब्दरत्नावली ॥ ( यथा, शान्तिशतके । ३ । २ ।
"दिवसरजनीकूलच्छेदैः पतद्भिरनारतं
वहति निकटे कालः स्रोतःसमस्तभवावहम् ।
इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोऽयं मोहो यदेव सदाविलः ॥"
तद्वैदिकपर्य्यायः । तलित् १ आसात् २ अम्बरम् ३ ओर्व्वसि ४ अस्तमीके ५ आके ६ उपाके ७ अर्व्वाके ८ अन्तमानाम् ९ अवमे १० उपमे ११ । इत्येकादशान्तिकनामानि । इति वेदनिघण्टौ २ अध्यायः ॥

निकरः, पुं, ( निकरोति व्याप्नोतीति । नि + कृ + अच् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ ( यथा, कलाविलासे । २ । १६ ।
"इत्यादिमुग्धबुद्धेरसमञ्जसवर्णनं रहः कृत्वा ।
गृह्णाति कनकनिकरं धूर्त्तस्तन्मनोरथैः पापः ॥")
सारः । न्यायदेयधनम् । निधिः । इति मेदिनी । रे, १७२ ॥

निकर्षणं, क्ली, ( निर्नास्ति कर्षणं यत्र । ) सन्निवेशः । इत्यमरः । २ । २ । १९ ॥ पत्तनादिषु दिगादिपरिच्छिन्नप्रदेशः । इति भरतः ॥ पूर्व्वदिगाद्यवच्छिन्नगृहाणामपीति कलिङ्गः ॥ पुरादेर्व्वहिर्व्विहरणभूमिः । इति स्वाम्यादयः ॥ प्राङ्गणादिसन्निवेशः । इति सारसुन्दरी ॥

निकषः, पुं, ( निकषति पिनष्टि स्वर्णादिकं यत्रेति । नि + कष + "गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति चकारात् घः । ) शाणः । इत्यमरः । २ । १० । ३२ ॥ कष्टिपाथर इति भाषा ) ( यथा, रघुः । १७ । ४६ ।
"निकषे हेमरेखेव श्रीरासीदनपायिनी ॥") ।

निकषा, स्त्री,( निकषति हिनस्तीति । कष हिंसे + पचाद्यच् । ततष्टाप् । ) राक्षसमाता । इत्यमरः ॥ सा सुमालिकन्या विश्रवसो भार्य्या च । इति रामायणम् ॥

निकषा, व, ( नि + कष गतौ + "आः समिन्निकषिभ्याम् ।" उणां । ४ । १७४ । इति आः । ) निकटम् । इत्यमरः । ३ । ४ । १६ ॥ ( यथा, माघे । १ । ६८ ।
"पयोधिमाबद्धचलज्जलाविलां
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥")
मध्यम् । इति मेदिनी । षे, ७६ ॥

निकषात्मजः, पुं, (निकषाया आत्मजः ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥

निकसः, पुं, ( निकषति पिनष्टि स्वर्णादिकं यत्र । नि + कष + घः । ) निकषः । इत्यमरटीकायां भरतः ॥

निकामं, क्ली, ( नि + कम इच्छायाम् + घञ् । ) इष्टम् । यथेप्सितम् । इत्यमरः । २ । ९ । ५७ ॥ ( यथा, देवीभागवते । १ । ७ । ४० ।
"कुर्व्वन्ति देवि ! भजनं सकलं निकामं
ज्ञात्वा समस्तजननीं किल कामधेनुम् ॥")

निकायः, पुं, ( निचीयते इति । नि + चि + "सङ्घे चानौत्तराधर्य्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च कः । ) लक्ष्यम् । सधर्म्मिप्राणिसङ्घः । ( यथा, महाभारते । १ । १२३ । ४५ ।
"तथा देवनिकायानां सेन्द्राणाञ्च दिवौकसाम्")